संहारस्य १४) ॥ चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनोषिभिः। कुर्य्यादनियते तस्य सम्बावपि निवेशनम्। रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता। इपरिच्छेदे

**अङ्गकर्म्मन्** न० अङ्गस्य कर्म्म मर्द्दनानुलेपनादि परिकर्म। मर्द्दनादिदेहसंस्कारे व्यापारे।

**अङ्गग्रह** पु० अङ्गस्य रोगादिना ग्रहः ६त०। देहवेदनायाम्।

**अङ्गज** पु० अङ्गात् जायते जन–ड। पुत्त्रे दुहितरि स्त्री। "अङ्गादङ्गं सम्भवति पुत्त्रवद्दुहिता नृणामिति" स्मृतिः। देहजातमात्रे त्रि०। रुधिरे न०। रोगे पु०। लोम्नि न०। "तवोत्तरीयं करिचर्म्म साङ्गजमिति" भार०। अङ्गजन्मादयोऽप्युक्तार्थे। अङ्गं मनः तस्मात् जाते कामे पु०।

**अङ्गज्वर** पु० अङ्गमङ्गम् अधिकृत्य ज्वरः। राजयक्ष्मरोगे। "निरवोचमहं यक्ष्म अङ्गज्वरमिति" वैद्यकम्।

**अङ्गण(न)** न०अगि–गतौ अङ्ग्यते गृहान्निःसृत्य गम्यते अत्र ल्युट् पृ० वा णत्वम्। अजिरे, चत्वरे, (उठान) इति ख्याते स्थाने "अजनि पङ्कुरपाङ्गनिजाङ्गणभ्रमिकणोऽपीति" नैषधम्। दन्त्यनान्तत्वमपि। "प्रकटाङ्गनोपभोगाप्यखण्डितचरित्रेति" काद०। अङ्गनं चत्वरमङ्गना स्त्री चेति तद्दृषः। करणे ल्युट्। याने।

**अङ्गति** पु० अङ्गति यात्यनेन अगि–करणे अति। वाहने स्त्रीत्वमपीत्येके वा ङीप्। अङ्ग्यते गम्यते सेवादिना कर्म्मणि अति। ब्रह्मणि, अग्नौ च। कर्त्तरि अति। अग्निहोत्रिणि पु०।

**अङ्गद** न० अङ्गं दायति शोधयति दै–क। (ताड़, वाजु) इति प्रसिद्धे बाहुभूषणे। बालिपुत्त्रे–वानरे पु०। सच किष्किन्ध्याधिपस्य वानरराजस्य बालिनस्तारागर्भजः पुत्त्रस्तच्चरितं रामायणे सुन्दरलङ्काकाण्डयोर्विस्तीर्णम्। अङ्गदानकर्त्तरि त्रि०। दक्षिणदिग्गजकरिण्यां स्त्रीत्येके। अङ्गं ददाति समर्पयति दा–क। अङ्गदानकर्त्तरि त्रि० योषिति स्त्री।

**अङ्गना** स्त्री प्रशस्तमङ्गमस्ति अस्याः अङ्ग+न। अङ्गसौष्ठववत्यां योषिति, योषिन्मात्रे च, "अङ्गना वामनस्य स्यात्" इति हैमोक्तेः वामनदिग्गजयोषिति च।

**अङ्गनाप्रिय** पु० प्री–क ६त०। अशोकवृक्षे तत्पुष्पेण हि स्त्रियः स्वाङ्गं भूषयन्तीति लोकसिद्धम्। योषित्प्रियमात्रे तु त्रि०। दक्षिणदिग्गजे वामने पु०।

**अङ्गदनिर्य्यूह** अङ्गदस्य केयूरस्य निर्य्यूह इव। केयूरशीर्षस्थे चूड़ाकारेऽग्रभागे।

**अङ्गन्यास** पु० अङ्गेषु हृदयादिषु मन्त्रभेदस्य न्यासः। मन्त्रविशेषस्य उच्चारणपूर्व्वकं करस्पर्शेन कर्त्तव्ये तन्त्रोक्ते न्यासभेदे "अङ्गन्यासं करन्यासं वीजन्यासन्तथैव चेति" तन्त्रम्।

**अङ्गपालि** स्त्री अङ्गं पाल्यते सम्बध्यतेऽत्र अङ्ग–पाल–इ। आलिङ्गने।

**अङ्गपालिका** स्त्री अङ्गं देहं पालयतीति पालि–ण्वुल् ६त०। (धाइ मा) इति ख्यातायाम् उपमातरि। अङ्गपालनकारके त्रि०।

**अङ्गप्रायश्चित्त** न० अङ्गस्य देहस्य शुद्ध्यर्थं प्रायश्चित्तम्। अशौचेषु पञ्चशूनाजन्यदुरितक्षयार्थं कार्य्ये "दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवत्। "दानञ्च विधिवद्देय मशुभात्तारकं हि तदिति" स्मृत्युक्ते दानरूपे प्रायश्चित्ते।

**अङ्गभू** पु० अङ्गात् देहात् मनसो वा भवति भू–क्विप्। पुत्त्रे, मनोजे कामे च देहमनोजातमात्रे त्रि०। "हिरण्यगर्भाङ्गभुवं मुनिं हरिः" इति माघः। नारदस्य तन्मनोजातत्वात् ब्रह्माङ्गभूत्वम्। अङ्गानामङ्गमन्त्राणां भूः। कृताङ्गन्यासे त्रि०। "ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मेति" कुमा०।

**अङ्गमन्त्र** पु० अङ्गेषु हृदयादिषु षट्सु न्यासो मन्त्रः। तन्त्रोक्ते षडदीर्घभाजि मन्त्रभेदे।

**अङ्गमर्द्द** पु०अङ्गं मर्द्दयति संवाहयति मृद–णिच् अच् ६त०। देहसंवाहके–सेवके। अङ्गमर्द्दनकारके त्रि०। भावे घञ्। देहमर्द्दने पु०।

**अङ्गमर्द्दक** पु० अङ्गं मर्द्दयति मृद–णिच्–ण्वुल् ६त०। देहसंवाहके–सेवके। देहमर्द्दनकारके त्रि०।

**अङ्गमर्द्दिन्** पु० अङ्गं मर्द्दयति मृद–णिच्–णिनि ६त०। अङ्गमर्दके सेवके। अङ्गमर्दनकारके त्रि० स्त्रियां ङीप्।

**अङ्गयज्ञ** पु० अङ्गीभूतः प्रधानयज्ञोपकरणीभूतः यज्ञः। "नवग्रहमखं कृत्वा ततः कर्म्म समाचरेदि" त्युक्ते कर्ममात्राङ्गे ग्रहयागादौ, दर्शाद्यङ्गे समिद्यागादौ च ते च "समिधो यजति, तनूनपातं यजति, इड़ो यजति, वर्हिर्यजति, स्वाहाकारं यजति, इत्येवं पञ्चविधाः। एतेषाञ्च सकृदनुष्ठानेनैव तन्त्रन्यायेन प्रधानयागानामाग्नेयादीनामुपकारितेति मीमांसा। अङ्गयागादयोऽप्यत्र। "अङ्गान्ययाक्षीदभितः प्रधानमिति" भट्टिः।

**अङ्गरक्त** न० पु० अङ्गेऽवयवे रक्तः रन्ज–क्त ७त०। काम्पिल्यदेशजाते रक्तवर्णचूर्णवति (गुड़ारोचना) इति वणिजेषु वैद्येषु च प्रसिद्धे वृक्षभेदे। ६व०रक्ताङ्गमात्रे त्रि०।

**अङ्गरक्षणी** अङ्गं रक्ष्यतेऽनया रक्ष–करणे ल्युट् ६त० ङीप्।